सप्त वामकरे दद्यान्मृदस्त्विंशच्चतुर्द्दश ।
तिस्रो वा हस्तयोः सप्त चतुर्द्दश च षोड़श ॥
पाण्योरेकां मृदं पृष्ठे षड़् तिस्रश्च मृत्तिका ।
हस्तद्वयनखेष्वेकां तिस्रश्च पद्मृदस्तथा ॥ * ॥
मैथुने रेतःस्खलने मूत्रोत्सर्गे च मृद्द्वयम् ।
दद्यात्तिस्रश्च शिश्नेकां तिस्रो वामकरे मृदः ॥
हस्ते च मृद्द्वयं मूत्रेत्तिस्रो वा शुद्धितत्परः ।
पदेकैके दिजस्तिस्रो गृहीत्यं शौचमाचरेत् ॥
गृहिणो द्विगुणं शौचं यतत्तो ब्रह्मचारिणाम् ।
गृहस्थवानप्रस्थानां प्रोक्तं त्रिगुणमेव च ॥
सन्न्यासिनां वैष्णवानां शौचं सेयं चतुर्गुणम् ।
हस्तपादादिपादन्तु मृद्भिरद्भिश्च गोमयैः ॥
दिवा यद्विहितं शौचं निशायामर्द्धकं भवेत् ।
एतदर्द्धमशौचे तु जातके मृतकेऽपि च ॥
चौरादिबाधिते मार्गे शौचमस्यार्द्धमाचरेत् ।
योषितामेतदर्द्धन्तु शूद्रादीनाञ्च नारद ! ॥
व्याधिभिश्चातुरो मर्त्य आर्त्तो यदि यथाबलम् ।
शौचं कुर्य्यात् कृतं यत्र तत् स्नानं शोधयेज्जलैः ॥
वेदस्मृतिपुराणानि धर्म्मशास्त्राणि नैत्यिकम् ।
मैत्रादिकर्म्म यः कुर्य्यादिहाय मन्दधीर्द्दिज ॥
प्रतिष्ठानमायुश्च श्रीर्हन्ति यशः श्रियम् ।
बलमाचारहीनस्य सदा तस्यापवित्रता ॥ * ॥
सात्वताश्चेद्दिजा भूपा वैश्यशूद्रान्त्यजाः स्त्रियः ।
कुर्व्वन्ति शौचं यत्नेन यावच्चेतःपवित्रता ॥
येषां कृष्णस्य मननं तथा नामप्रजल्पनम् ।
सदैव स्मरणं भागवतानां साधुसेवनम् ॥
भक्तिप्रधौतमनसां गोविन्दार्पितकर्म्मणाम् ।
वाह्यान्तःक्षाणचित्तानां शुचिता तदहर्निशम् ॥
मृद्गोमयजलैः शौचमनेकैः कुरुते यदि ।
मनोऽपवित्रता यस्य कदाचिद्वै न शुध्यति ॥
गोविन्ददासता नास्ति यस्य लोकस्य जन्मनि ।
सोऽपि देहाशुचिः कृत्वा शौचं मैत्रादिकर्म्मसु ॥
शतधा यदि दैवेषु शौचं कुर्य्यात् सहस्रधा ।
मृद्वारिगोमयैर्लोको भावदुष्टो न शुध्यति ॥
सदा चित्तापवित्रत्वमकार्य्यां भुवि यो नरः ।
तस्य तु स्यान्न मैत्रादिशौचेनैव स शुध्यति ॥
पर्व्वताकारकूटैश्च गोविट्सर्व्वनदीजलैः ।
शौचं कृत्वा न शुध्येत दुष्टचित्तो भवेद्यदि ॥"
इति पाद्मोत्तरखण्डे १०६ अध्यायः ॥
(उदकम् । इति निघण्टुः । १ । १२ ॥ "पूरयति जगत् प्रलयकाले पूर्य्यते अनेन तड़ागादि पालकं वा जगतः प्रस्रोतृपत्तिहेतुत्वात् । शृणातेर्व्वा बाहुलकात् कीषन्प्रत्ययः ईकारस्योकारादेशः स च पकारात् परो द्रष्टव्यः ।" इति तत्र देवराजयज्वा ॥ यथा, ऋग्वेदे । १ । १६३ । १ ।
"यदक्रन्दः प्रथमं जायमान
उद्यन्त्समुद्रादुत वा पुरीषात् ॥"
"पुरीषात् सर्व्वकामानां पूरकाद्दकात् ॥"
इति तद्भाष्ये सायनः ॥ )
पुरीषणः, पुं, ( पुर्य्या देहात् इष्यते त्यज्यते इति । पुरी+इष+कर्म्मणि ल्युट् । ) पुरीषम् । इति त्रिकाण्डशेषः ॥

पुरीषमः, पुं, ( पुरीषं मिमीते इति । मा+कः । ) माषः । इति त्रिकाण्डशेषः ॥
पुरुः, पुं, ( पिपर्त्ति पूर्य्यते वेति । पॄ+"पॄभिदिव्यधिगृधिधृषिहृषिभ्यः ।" उणा० १ । २४ । इति कुः । "उदोष्ठ्यपूर्व्वस्य ।" ७ । १ । १०२ । इति उत्वम् । "उरण्रपरः ।" १ । १ । ५१ । इति रपरत्वम् । ) देवलोकः । नृपभेदः । स च ययातेः कनिष्ठपुत्त्रः । ( आद्युदात्तोऽपि पाठः । ) परागः । इति मेदिनी । रे, ५८ ॥ दैत्यः । इत्युणादिकोषः ॥ नदीभेदे, त्रि । इति शब्दरत्नावली ॥ ( राजविशेषः । यथा, महाभारते । २ । ४ । २७ ।
"सुकर्म्मा चेकितानश्च पुरुश्चामित्रकर्षणः ॥"
चाक्षुषमनोः पुत्त्रभेदः । यथा, मार्कण्डेये । ७६ । ५५ ।
"ऊरुपुरुशतद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्त्राः पृथिवीपतयोऽभवन् ॥"
पर्व्वतभेदः । यथा, महाभारते । ३ । ९० । २२ ।
"पर्व्वतश्च पुरुर्नाम यत्र जातः पुरूरवाः ।
भृगुर्यत्र तपस्तेपे महर्षिगणसेविते ॥"
शरीरम् । यथा, शङ्करविजये । १३ अध्याये ।
"पुरुसंज्ञे शरीरेऽस्मिन् शयनात् पुरुषो हरिः ।
शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते ॥" )
प्रचुरे, त्रि । इत्यमरः । ३ । १ । ६३ ॥ ( यथा, नैषधे । १९ । ५ ।
"स्फुरति तिमिरस्तोमः पङ्कप्रपञ्च इवोच्चकैः
पुरुसितगरुत्पक्षच्चूपुटस्फुटचुम्बितः ॥" )
पुरुकुत्सवः, पुं, इन्द्ररिपुविशेषः । यथा,—
"इन्द्रो विपश्चिद्देवानां तद्रिपुः पुरुकुत्सवः ।
जघान हस्तिरूपेण भगवान्मधुसूदनः ॥"
इति गारुड़े ८७ अध्यायः ॥
पुरुदंशकः, पुं, ( पुरु बहुलं यथा स्यात्तथा दशतीति । दनृश+ण्वुल् । ) हंसः । इति त्रिकाण्डशेषः ॥
पुरुदंशाः, [स्] पुं, ( पुरुं दैत्यविशेषं दशति छिनत्तीति । दनृश+असुन् । ) इन्द्रः । इति जटाधरः ॥
पुरुषः, पुं, ( पुरति अग्रे गच्छतीति । पुर+"पुरः कुषन् ।" उणा० ४ । ७४ । इति कुषन् । ) पिपर्त्ति पूरयति बलं यः पुरुं शेते य इति वा । पुमान् । ( यथा, मनौ । १ । ३२ ।
"द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् ।
अर्द्धेन नारी तस्यां स विराजमसृजत् प्रभुः ॥" )
तत्पर्य्यायः । पूरुषः २ ना ३ नरः ४ पञ्चजनः ५ पुमान् ६ अर्थाश्रयः ७ अधिकारी ८ कर्म्माङ्गः ९ जनः १० अर्थवान् ११ । इति राजनिर्घण्टः ॥ मनुष्यः १२ मानवः १३ मर्त्यः १४ मानुषः १५ मनुः १६ । इति शब्दरत्नावली ॥ रसिकराजः १७ घनकामधामा १८ मदनशायकाङ्कः १९ मन्मथशायकलक्ष्यः २० । इति कविकल्पलता ॥ स चतुर्विधः । यथा,—
"शशो मृगो वृषश्चाश्वो नृणां जातिचतुष्टयम् ॥"
शशादीनां लक्षणं यथा,—
"मृदुवचनसुशीलः कोमलाङ्गः सुकेशः
सकलगुणनिधानः सत्यवादी शशोऽयम् ॥१॥
वदति मधुरवाणीं दीर्घनेत्रोऽतिभीरु-
श्चपलमतिसुदेहः शीघ्रवेगो मृगोऽयम् ॥२॥
बहुगुणबहुवस्नुः शीघ्रकामो नताङ्गः
सकलरुचिरदेहः सत्यवादी वृषोऽयम् ॥३॥
उदरकटिकृशः स्याद्दुष्टकण्ठाधरौष्ठो
दशनवदननासाश्रोत्रदीर्घो हि वाजी ॥"४॥
इति रतिमञ्जरी ॥ * ॥
तस्य पञ्चलक्षणत्वं यथा,—
"पात्रे त्यागी गुणे रागी भोगी परिजनैः सह ।
शास्त्रे बोद्धा रणे योद्धा पुरुषः पञ्चलक्षणः ॥"
इति प्राचीनाः ॥
जितेन्द्रियस्य पुरुषत्वं यथा,—
"सा श्रीर्या न मदं कुर्य्यात् स सुखी तृष्णयोज्झितः ।
तन्मित्रं यत्र विश्वासः पुरुषः स जितेन्द्रियः ॥"
इति गारुड़े १६ अध्यायः ॥ * ॥
( अस्य लक्षणादिकं यथा,—
"उन्मानमानगतिसंहतिसारवर्ण-
स्नेहस्वरप्रकृतिसत्त्वमनूकमादौ ।
क्षेत्रं मृजाञ्च विधिवत् कुशलोऽवलोक्य
सामुद्रविद्वदति यातमनागतञ्च ॥
अस्वेदनौ मृदुतलौ कमलोदराभौ
श्लिष्टाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी ।
उष्णौ शिराविरहितौ सुनिगूढगुल्फौ
कूर्म्मोन्नतौ च चरणौ मनुजेश्वरस्य ॥
शूर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरासन्ततौ
संशुष्कौ विरलाङ्गुली च चरणौ दारिद्र्यदुःखप्रदौ ।
मार्गायोत्कटकौ कषायसदृशौ वंशस्य विच्छित्तिदौ
ब्रह्मघ्नौ परिपक्वमृद्द्युतितलौ पीतावगम्यारतौ ॥
प्रविरलतनुरोमवृत्तजङ्घा
द्विरदकरप्रतिमैर्वरोरुभिश्च ।
उपचितसमजानवश्च भूपा
धनरहिताः श्वशृगालतुल्यजङ्घाः ॥
रोमैकैकं कूपके पार्थिवानां
द्वे द्वे ज्ञेये पण्डितश्रोत्रियाणाम् ।
त्र्याद्यैर्निःस्वा मानवा दुःखभाजः
केशाश्चैवं निन्दिताः पूजिताश्च ॥
निर्मांसजानुर्म्रियते प्रवासे
सौभाग्यमल्पैर्विकटैर्दरिद्राः ।
स्त्रीनिर्जितास्चापि भवन्ति निम्नै
राज्यं समांसैश्च महद्भिरायुः ॥
लिङ्गेऽल्पे धनवानपत्यरहितः स्थूले विहीनो धनै-
र्मेढ़्रे वामनते सुतार्थरहितो वक्रेऽन्यथा पुत्त्रवान् ।
दारिद्र्यं विनते त्वधोऽल्पतनयो लिङ्गे शिरासन्तते
स्थूलग्रन्थियुते सुखी मृदु करोत्यन्तं प्रमेहादिभिः ॥